॥ श्रीः ॥

॥ लघुस्तोत्राणि ॥

(प्रथमो भागः)

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीसच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

विरचितानि ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रितानि ।

१९०८.

Copyright *Registered.*



॥ श्रीः ॥

॥ गौरीगिरीशकल्याणस्तोत्रम् ॥

चन्द्रार्धप्रविभासिमस्तकतटौ तन्द्राविहीनौ सदा
भक्तौघप्रतिपालने निजतनुच्छायाजितार्कायुतौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ कारुण्यवारांनिधी
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ १ ॥

अन्योन्यार्चनतत्परौ मधुरवाक्सन्तोषितान्योन्यकौ
चन्द्रार्धाञ्चितशेखरौ प्रणमतामिष्टार्थदौ सत्वरम् ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ शृङ्गारजन्मावनी
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ २ ॥

सौन्दर्येण परस्परं प्रमुदितावन्योन्यचित्तस्थितौ
राकाचन्द्रसमानवक्त्रकमलौ पाकाब्जकालंकृतौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ तुङ्गातटावासिनौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ३ ॥

सिंहोक्षाग्र्यगती महोन्नतपदं संप्रापयन्तौ नता-
नंहोराशिनिवारणैकनिपुणौ ब्रह्मोग्रविष्ण्वर्चितौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ गाङ्गेयभूषोज्ज्वलौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ४ ॥

कस्तूरीघनसारचर्चिततनू प्रस्तूयमानौ सुरै-
रस्तूक्त्या प्रणतेष्टपूरणकरौ वस्तूपलब्धिप्रदौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतावङ्गावधूतेन्दुभौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ५ ॥

वाणीनिर्जितहंसकोकिलरवौ पाणीकृताम्भोरुहौ
वेणीकेशविनिर्जिताहिचपलौ क्षोणीसमानक्षमौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ तुङ्गेष्टजालप्रदौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ६ ॥

कामापत्तिविभूतिकारणदृशौ सोमार्धभूषोज्ज्वलौ
सामाम्नायसुगीयमानचरितौ रामार्चिताङ्घ्रिद्वयौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ माणिक्यभूषान्वितौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ७ ॥

दम्भाहंकृतिदोषशून्यपुरुषैः संभावनीयौ सदा
जम्भारातिमुखामरेन्द्रविनुतौ कुम्भात्मजाद्यर्चितौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ वाग्दानदीक्षाधरौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ८ ॥

शापानुग्रहशक्तिदाननिपुणौ तापापनोदक्षमौ
सोपानक्रमतोऽधिकारिभिरनुप्राप्यौ क्षमासागरौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ लावण्यपाथोनिधी
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ ९ ॥

शोणाम्भोरुहतुल्यपादयुगलौ बाणार्चनातोषितौ
वीणाधृन्मुनिगीयमानविभवौ बालारुणाभाम्बरौ ।
शृङ्गाद्रिस्थविवाहमण्टपगतौ तुल्याधिकैर्वर्जितौ
कल्याणं तनुतां समस्तजगतां गौरीगिरीशौ मुदा ॥ १० ॥

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि
श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः
विरचितं
गौरीगिरीशकल्याणस्तोत्रम्
समाप्तम् ।





॥ श्रीः ॥

॥ पादपङ्कजाष्टकम् ॥

मातस्त्वत्पदपङ्कजं कलयतां चेतोऽम्बुजे सन्ततं
मानाथाम्बुजसंभवाद्रितनयाकान्तैः समाराधितम् ।
वाञ्छापूरणनिर्जितामरमहीरुङ्गर्वसर्वस्वकं
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ॥ १ ॥

मातस्त्वत्पदपङ्कजं मुनिमनःकासारवासादरं
मायामोहमहान्धकारमिहिरं मानातिगप्राभवम् ।
मातङ्गाभिमतिं स्वकीयगमनैर्निर्मूलयत्कौतुका-
द्वन्देऽमन्दतपःफलाप्यनमनस्तोत्रार्चनाप्रक्रमम् ॥ २ ॥

मातस्त्वत्पदपङ्कजं प्रणमतामानन्दवारांनिधे
राकाशारदपूर्णचन्द्रनिकरं कामाहिपक्षीश्वरम् ।
बृन्दं प्राणभृतां स्वनाम वदतामत्यादरात्सत्वरं
षड्भाषासरिदीश्वरं प्रविदधत्षाण्मातुराचर्यं भजे ॥ ३ ॥

कामं फालतले दुरक्षरततिर्दैवी ममास्तान्न भीः
मातस्त्वत्पदपङ्कजोत्थरजसा लुम्पामि तां निश्चितम ।
मार्कण्डेयमुनिर्यथा भवपदाम्भोजार्चनाप्राभवात् ।
कालं तद्वदहं चतुर्मुखमुखाम्भोजातसूर्यप्रभे ॥ ४ ॥


पापानि प्रशमं नयाशु ममतां देहेन्द्रियप्राणगां
कामादीनपि वैरिणो दृढतरान्मोक्षाध्वविघ्नप्रदान ।
स्निग्धान्पोषय सन्ततं शमदमध्यानादिमान्मोदतो
मातस्त्वत्पदपङ्कजं हृदि सदा कुर्वे गिरां देवते ॥ ५ ॥

मातस्त्वत्पदपङ्कजस्य मनसा वाचा क्रियातोऽपि वा
ये कुर्वन्ति मुदान्वहं बहुविधैर्दिव्यैः सुमैरर्चनाम् ।
शीघ्रं ते प्रभवन्ति भूमिपतयो निन्दन्ति च स्वाश्रिया
जम्भारातिमपि ध्रुवं शतमखीकष्टाप्रनाकश्रियम् ॥ ६ ॥

मातस्त्वत्पदपङ्कजं शिरसि ये पद्माटवीमध्यत-
श्चन्द्राभं प्रविचिन्तयन्ति पुरुषाः पीयूषवर्ष्यन्वहम् ।
ते मृत्युं प्रविजित्य रोगरहिताः सम्यग्दृढाङ्गाश्चिरं
जीवन्त्येव मृणालकोमलवपुष्मन्तः सुरूपा भुवि ॥ ७ ॥

मातस्त्वत्पदपङ्कजं हृदि मुदा ध्यायन्ति ये मानवाः
सच्चिद्रूपमशेषवेदशिरसां तात्पर्यगम्यं मुहुः ।
अत्यागेऽपि तनोरखण्डपरमानन्दं वहन्तः सदा
सर्वं विश्वमिदं विनाशि तरसा पश्यन्ति ते पूरुषाः ॥ ८ ॥

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि
श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः
विरचितं
पादपङ्कजाष्टकम्
ससाप्तम् ।





॥ श्रीः ॥

॥ पृथ्वीधरराजपुत्र्यष्टकम् ॥

ज्ञात्वापि दोषान्विषयेषु शब्द-
रसादिमेष्वप्रतिबद्धतर्षम् ।
आकारमात्रात्परहंसरूपं
मां पाहि पृथ्वीधरराजपुत्रि ॥ १ ॥

विवेकवैराग्यशमादिषट्क-
मुमुक्षुतागन्धलवानभिज्ञम् ।
नक्तंदिवं स्वोदरपूरणेच्छुं
मां पाहि पृथ्वीधरराजपुत्रि ॥ २ ॥

काषायवस्त्रेण करात्तदण्ड-
कमण्डलुभ्यां जपमालया च ।
विभ्रामयन्तं गृहिणां कदम्बं
मां पाहि पृथ्वीधरराजपुत्रि ॥ ३ ॥

वेदान्तवाक्यानि मुधोच्चरन्तं
तदर्थजातं बहु वर्णयन्तम् ।
कदापि नध्यातपरात्मतत्वं
मां पाहि प्रथ्वीधरराजपुत्रि ॥ ४ ॥

सुवर्णतन्तूज्ज्वलचेलकामं
यानेषु मानेषु विवृद्धरागम् ।
अङ्गीकृतानेकसुमित्रशत्रुं
मां पाहि पृथ्वीधरराजपुत्रि ॥ ५ ॥

भोगाननेकान्मनसाप्यलभ्यान्
भूयासुरित्यन्वहमीहमानम् ।
गुरूत्तमाराधनदूरचित्तं
मां पाहि पृथ्वीधरराजपुत्रि ॥ ६ ॥

कुतो यतेरस्य शरीरमान-
　　धनाभिमानः सततं दुरन्तः ।
अशेषलोकैरिति निन्द्यमानं
　　मां पाहि पृथ्वीधरराजपुत्रि ॥ ७ ॥

निवारिताशेषमहाघवृन्दै-
　　रव्याजकारुण्यसुधातरङ्गैः ।
अपाङ्गपातैरवलोकयन्ती
　　मां पाहि पृथ्वीधरराजपुत्रि ॥ ८ ॥

इदं हि पृथ्वीधरराजपुत्री-
　　पादारविन्दार्पितमानसेन ।
कर्मन्दिना निर्मितमष्टकं यः
　　पठेत्स भूयादखिलेष्टगेहम् ॥ ९ ॥

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि
श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः
विरचितं
पृथ्वीधरराजपुत्र्यष्टकम्
समाप्तम् ।



॥ श्रीः ॥

॥ श्रीललिताम्बापरमेश्वरस्तोत्रम् ॥

कल्याणशैलधन्वा
करधृतकुम्भाक्षमालिकामुद्रः ।
कलयतु मम संतोषं
करिचर्मधरः कृपापयोराशिः ॥ १ ॥

एकात्मकत्वधिषणा-
मेधयतीमीशजीवयोर्नमताम् ।
एकान्तवासलभ्या-
मेकां पुण्यावलिं नुमः शंभोः ॥ २ ॥

ईशोऽर्धवपुर्यस्या
ईप्सितपङ्क्तिर्यदङ्घ्रिनतसुलभा ।
ईकाररूपिणीं ता-
मीश्वरपत्नीं हृदा सदा कलये ॥ ३ ॥

लभ्यन्तेऽखिलविभवा
लब्धावसरैर्यदीयमन्त्रजपे ।
लक्ष्मीगीर्विनुता सा
लक्ष्या भूयान्मदीयचित्तस्य ॥ ४ ॥

ह्रींकारपद्मभृङ्गौ
ह्रींकारावृत्तिशीलनरसुलभौ ।
ह्रींकारगिरिमृगेन्द्रौ
ह्रींकारेणैव भावयामि शिवौ ॥ ५ ॥

हरतादाशु जडत्वं
हरिदधिपाराध्यपादपाथोजः ।
हरिणाङ्ककलितचूडो
हृतवर्ष्मार्धः कुलाद्रिकन्यकया ॥ ६ ॥

सत्यं ज्ञानमितीमे
सकलाम्नाया वदन्ति यद्रूपम् ।
सद्गुरुमुखैकवेद्यां
सन्मतिदां नौमि तां परामनिशम् ॥ ७ ॥

कर्मभिरात्मानुगुणैः
कलितामलभावचित्तकंजातैः ।
कतिपयपुरुषवरेण्यैः
कथमपि बुद्धं नमामि शशिमौलिम् ॥ ८ ॥

हतरिपुवर्गैः शान्तै-
र्हरिहयपद्मोद्भवादिपदविमुखैः ।
हंसवरैः परमाद्यै-
र्हस्ताम्बुजपूजितं नमामि हरम् ॥ ९ ॥

ललितां कवित्वसरणिं
लभते मूकोऽपि यत्कृपालेशात् ।
लङ्केशाहितविनुतां
लम्बोदरमातरं नमस्ये ताम् ॥ १० ॥

ह्रींकारगेहगृहिणौ
ह्रींकारपयःपयोधिकल्पतरू ।
ह्रींकारवनमयूरौ
ह्रींकारशरीरिणौ शिवौ वन्दे ॥ ११ ॥

सम्यङ्निरुध्य चेतः
सकलानि निगृह्य करणानि ।
सततं यतिभिर्हृदये
समाधिभाव्यां नमामि ललिताम्बाम् ॥ १२ ॥

कणभुक्कपिलाराध्यः
कथिताधिकसौख्यदानकृतदीक्षः ।
करविधृतहरिणबालः
कलाभिवृद्ध्यै ममास्तु परमेशः ॥ १३ ॥

ललनाभिस्त्रिदशानां
ललितैर्गीतैः स्तुतात्मचारित्राम् ।
लसदलकफालदेशां
लभ्यां योगैर्नमामि जगदम्बाम् ॥ १४ ॥

ह्रींकारसौधराजौ
ह्रींकाराम्भोधिपूर्णसितकिरणौ ।
ह्रींकारवाच्यरूपौ
ह्रीं निष्कुटकोकिलौ शिवौ कलये ॥ १५ ॥

आदौ यन्मनुवर्णै-
र्घटिता रचिता स्तुतिर्येयम् ।
सा ललिता तामूरी-
कुर्यादव्याजकरुणाङ्गी ॥ १६ ॥

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि
श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः
विरचितं
श्रीललितापञ्चदशीमन्त्रवर्णमुखनिबद्ध
श्रीललिताम्बापरमेश्वरस्तोत्रम्
समाप्तम् ।



॥ श्रीः ॥

॥ शारदाषट्कम् ॥

वेदाभ्यासजडोऽपि यत्करसरोजातग्रहात्पद्मभू-
श्चित्रं विश्वमिदं तनोति विविधं वीतक्रियं सक्रियम् ।
तां तुङ्गातटवाससक्तहृदयां श्रीचक्रराजालयां
श्रीमच्छंकरदेशिकेन्द्रविनुतां श्रीशारदाम्बां भजे ॥ १ ॥


यः कश्चिद्दुर्द्धिहीनोऽप्यविदितनमनध्यानपूजाविधानः
कुर्याद्यद्यम्ब सेवां तव पदसरसीजातसेवारतस्य ।
चित्रं तस्यास्यमध्यात्प्रसरति कविता वाहिनीवामराणां
सालंकारा सुवर्णा सरसपदयुता यत्नलेशं विनैव ॥ २ ॥

सेवापूजानमनविधयः सन्तु दूरे नितान्तं
कादाचित्का स्मृतिरपि पदाम्भोजयुग्मस्य तेऽम्ब ।
मूकं रङ्कं कलयति सुराचार्यमिन्द्रं च वाचा
लक्ष्म्या लोको न च कलयते तां कलेः किं हि दौःस्थ्यम् ॥

दृष्ट्वा त्वत्पादपङ्केरुहनमनविधावुद्यतान् भक्तलोकान्
दूरं गच्छन्ति रोगा हरिमिव हरिणा वीक्ष्य यद्वत्सुदूरम् ।
कालः कुत्रापि लीनो भवति दिनकरे प्रोद्यमाने तमोवत्
सौख्यं चायुर्यथाब्जं विकसति वचसां देवि शृङ्गाद्रिवासे ॥

त्वत्पादाम्बुजपूजनाप्तहृदयाम्भोजातशुद्धिर्जनः
स्वर्गं रौरवमेव वेत्ति कमलानाथास्पदं दुःखदम् ।
कारागारमवैति चन्द्रनगरं वाग्देवि किं वर्णनै-
र्दृश्यं सर्वमुदीक्षते स हि पुनारज्जूरगाद्यैः समम् ॥ ५ ॥

त्वत्पादाम्बुरुहं हृदाख्यसरसि स्याद्रूढमूलं यदा
वक्त्राब्जे त्वमिवाम्ब पद्मनिलया तिष्ठेद्गृहे निश्चला ।
कीर्तिर्यास्यति दिक्तटानपि नृपैः संपूजिता स्यात्तदा
वादे सर्वनयेष्वपि प्रतिभटान् दूरे करोत्येव हि ॥ ६ ॥



॥ आत्मावबोधनस्तुतिः ॥

जाग्रत्स्वप्नसुषुप्तिषु
शैशवकौमारवार्धकेष्वपि च ।
अनुवर्तमानमनिशं
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १ ॥

सद्गुरुसेवननिरतैः
स्वाश्रमवर्णोचितानि कर्माणि ।
कुर्वद्भिर्विविदिषितं
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ २ ॥

स्थूलात्सूक्ष्माद्धेतोः
देहाद्भेदेन योगनिष्णातैः ।
अनुचिन्त्यमानमसकृत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ३ ॥

यददेहमखिलदेहे-
ष्वनवस्थेषु व्यवस्थितं विभु च ।
महदात्मभूतमभयं
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ४ ॥

हृदयस्थितानशेषान्
त्यक्त्वा कामान्समश्नुतेऽत्रैव ।
यत्परहंसस्तदहं
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ५ ॥

यदबोधाज्जगदखिलं
विभाति पुरुषस्य सत्यतया ।
यद्बोधाच्च मृषा तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ६ ॥

प्रविलाप्य दृश्यजालं
मिथ्येत्याचार्यवाक्यतः शास्त्रात् ।
यत्प्राप्नोति नरस्तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ७ ॥

यस्याज्ञानादखिला-
　　नर्थादिमकारणं शरीरादौ ।
आत्मत्वधीरभूत्तत्
　　ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ८ ॥

यत्साक्षात्कृतये हि
　　श्रवणं मननं तथा ध्यानम् ।
प्राहुस्त्रय्यन्तास्तत्
　　ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ९ ॥

नद्यास्तीरे पुलिने
　　गिरिमौलौ काननस्य कोणे यत् ।
ध्यायन्ति यतिवरास्तत्
　　ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १० ॥

यत्र स्थितो विजानाति
　　इन्द्रोपेन्द्रादिपदमपीषदिति ।
तत्सुखविश्रान्तिपदं
　　ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ ११ ॥

श्रुत्याचार्यकृपातो
योगाभ्यासेन चेश्वरकटाक्षात् ।
प्रभवति यद्बोधस्तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १२ ॥

यस्मिन्स्थितो न दुःखै-
रपि गुरुभिश्चाल्यते जातु ।
पुरुषः सुखरूपं तत्
ब्रह्मास्म्याम्नायमस्तकावद्यम् ॥ १३ ॥

यत्पृथ्व्यादिषु तिष्ठ-
द्यमयति यद्वेदनैव पृथ्व्यादिः ।
अन्तर्याम्यभिधं तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १४ ॥

उद्दालकः स्वपुत्रं
यत्तत्त्वमसीति बोधयामास ।
साम्नामन्ते तदहं
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १५ ॥

विषयासक्तहृदां य-
दूरे तदसक्तचेतसां निकटे ।
उपरतवरलभ्यं तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १६ ॥

सनकादिभ्यः पूर्वं
वटमूले शम्भुराह मौनेन ।
चिन्मुद्रया च यत्तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १७ ॥

विनियम्य चक्षुरादीन
प्राणापानौ च चेतसा सह यत् ।
ध्यायन्ति योगिनस्तत्
ब्रह्मास्म्याम्नायमस्तकावेद्यम् ॥ १८ ॥



॥ नरसिंहनवरत्नमाला ॥

अद्वैतवास्तवमतेः प्रणमज्जनानां
संपादनाय धृतमानवसिंहरूपम् ।
प्रह्लादपोषणरतं प्रणतैकवश्यं
देवं मुदा कमपि नौमि कृपासमुद्रम् ॥

कृपासागरं क्लिष्टरक्षाधुरीणं
कृपाणं महापापवृक्षौघभेदे ।
नतालीष्टवाराशिराकाशशाङ्कं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ १ ॥

यदीयस्वरूपं शिखावेदराजे-
रजस्रं मुदा सम्यगुद्घोषयन्ति ।
नलिन्यास्तटे स्वैरसञ्चारशीलं
चिदानन्दरूपं तमीडे नृसिंहम् ॥ २ ॥

यदङ्घ्रयब्जसेवापराणां नराणां
विरक्तिर्दृढा जायतेऽर्थेषु शीघ्रम् ।
तमङ्गप्रभाधूतपूर्णेन्दुकोटिं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ३ ॥

विवेके विरक्तिं शमादेश्च षट्कं
मुमुक्षां च संप्राप्य वेदान्तजालैः ।
यतन्ते विबोधाय यस्यानिशं तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ४ ॥

जगन्नेति नेतीति वाक्यैर्निषिद्धया-
वशिष्टं परं ब्रह्मरूपं महान्तः ।
स्वरूपेण विज्ञाय मुक्ता हि यं तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ५ ॥


इनान्तर्दृगन्तश्च गाङ्गेयदेहं
सदोपासतेयं नराः शुद्धचित्ताः ।
तमस्ताघमेनोनिवृत्त्यै नितान्तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ६ ॥

शिवं शैववर्या हरिं वैष्णवाग्र्याः
पराशक्तिमाहुस्तथा शक्तिभक्ताः ।
यमेवाभिधाभिः परं तं विभिन्नं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ७ ॥

यमाहुर्हि देहं हृषीकाणि केचित्
परेऽसूंस्तथा बुद्धिशून्ये तथान्ये ।
यदज्ञानमुग्धा जना नास्तिकाग्र्याः
सदानन्दरूपं तमीडे नृसिंहम् ॥ ८ ॥

पिनाकं रथाङ्गं वरं चाभयं च
प्रफुल्लाम्बुजाकारहस्तैर्दधानम् ।
फणीन्द्रातपत्रं शुचीनेन्दुनेत्रं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ ९ ॥

नवेमानि भक्त्याख्यसूत्रेण
हृद्धान्यमोघानि रत्नानि कण्ठे जनाय ।
धरिष्यन्ति तान्मुक्तिकान्ता वृणीते
सखीभिर्वृता शान्तिदान्त्यादिमाभिः ॥ १० ॥



॥ श्रीः ॥

॥ कालभैरवाष्टकम् ॥

अङ्गसुन्दरत्वनिन्दिताङ्गजातवैभवं
भृङ्गसर्वगर्वहारिदेहकान्तिशोभितम् ।
मङ्गलौघदानदक्षपादपद्मसंस्मृतिं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ १ ॥

पादनम्रमूकलोकवाक्प्रदानदीक्षितं
वेदवेद्यमीशमोदवार्धिशुभ्रदीधितिम् ।
आदरेण देवताभिरर्चिताङ्घ्रिपङ्कजं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ २ ॥

अम्बुजाक्षमिन्दुवक्त्रमिन्दिरेशनायकं
कम्बुकण्ठमिष्टदानधूतकल्पपादपम् ।
अम्बरादिभूतरूपमम्बरायिताम्बरं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ३ ॥

मन्दभाग्यमप्यरं सुरेन्द्रतुल्यवैभवं
सुन्दरं च कामतोऽपि संविधाय संततम् ।
पालयन्तमात्मजातमादरात्पिता यथा
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ४ ॥

नम्रकष्टनाशदक्षमष्टसिद्धिदायकं
कम्रहासिशोभितुण्डमच्छगण्डदर्पणम् ।
कुन्दपुष्पमानचोरदन्तकान्तिभासुरं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ५ ॥

काशिकादिदिव्यदेशवासलोलमानसं
पाशिवायुकिन्नरेशमुख्यदिग्धवार्चितम् ।
नाशिताघबृन्दमङ्घ्रिनम्रलोकयोगदं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ६ ॥

सारमागमस्यतुङ्गसारमेयवाहनं
दारितान्तरान्ध्यमाशु नैजमन्त्रजापिनः ।
पूरिताखिलेष्टमष्टमूर्तिदेहसंभवं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ७ ॥

कालभीतिवारणं कपालशोभिपाणिनं
खण्डितामरारिमिन्दुबालशोभिमस्तकम् ।
चण्डबुद्धिदानदक्षमक्षतात्मशासनं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ८ ॥

